# shrI sudarshanAShTottarashatanAmastotram

# શ્રીસુદર્શનાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : sudarshanAShTottarashatanAmstotra

File name : sudarshan108stotra.itx

Category : aShTottarashatanAma, vishhnu, stotra

Location : doc_vishhnu

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : April 25, 2008

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 30, 2019

*sanskritdocuments.org*

# શ્રીસુદર્શનાષ્ટોત્તરશતનામસ્તોત્રમ્

॥ શ્રીઃ ॥

સુદર્શનશ્ચક્રરાજઃ તેજોવ્યૂહો મહાદ્યુતિઃ ।
સહસ્રબાહુ-ર્દીપ્તાઙ્ગઃ અરુણાક્ષઃ પ્રતાપવાન્ ॥ ૧॥

અનેકાદિત્યસઙ્કાશઃ પ્રોદ્યજ્જ્વાલાભિરઞ્જિતઃ ।
સૌદામિની-સહસ્રાભઃ મણિકુણ્ડલ-શોભિતઃ ॥ ૨॥

પઞ્ચભૂતમનોરૂપો ષટ્કોણાન્તર-સંસ્થિતઃ ।
હરાન્તઃ કરણોદ્ભૂત-રોષભીષણ-વિગ્રહઃ ॥ ૩॥

હરિપાણિલસત્પદ્મવિહારારમનોહરઃ ।
શ્રાકારરૂપસ્સર્વજ્ઞઃ સર્વલોકાર્ચિતપ્રભુઃ ॥ ૪॥

ચતુર્દશસહસ્રારઃ ચતુર્વેદમયો-ઽનલઃ ।
ભક્તચાન્દ્રમસજ્યોતિઃ ભવરોગ-વિનાશકઃ ॥ ૫॥

રેફાત્મકો મકારશ્ચ રક્ષોસૃગ્રૂષિતાઙ્ગકઃ ।
સર્વદૈત્યગ્રીવનાલ-વિભેદન-મહાગજઃ ॥ ૬॥

ભીમદંષ્ટ્રોજ્જ્વલાકારો ભીમકર્મા વિલોચનઃ ।
નીલવર્ત્મા નિત્યસુખો નિર્મલશ્રી-ર્નિરઞ્જનઃ ॥ ૭॥

રક્તમાલ્યાંબરધરો રક્તચન્દનરૂષિતઃ ।
રજોગુણાકૃતિશ્શૂરો રક્ષઃકુલ-યમોપમઃ ॥ ૮॥

નિત્યક્ષેમકરઃ પ્રાજ્ઞઃ પાષણ્ડજનખણ્ડનઃ ।
નારાયણાજ્ઞાનુવર્તી નૈગમાન્તઃપ્રકાશકઃ ॥ ૯॥

બલિનન્દનદોર્દણ્ડ-ખણ્ડનો વિજયાકૃતિઃ ।
મિત્રભાવી સર્વમયો તમોવિધ્વંસકસ્તથા ॥ ૧૦॥

રજસ્સત્ત્વતમોદ્વર્તી ત્રિગુણાત્મા ત્રિલોકધૃત્ ।

હરિમાયાગુણોપેતો-ઽવ્યયો-ઽક્ષસ્વરૂપભાક્ ॥ ૧૧॥

પરમાત્મા પરંજ્યોતિઃ પઞ્ચકૃત્ય-પરાયણઃ ।
જ્ઞાનશક્તિ-બલૈશ્વર્ય-વીર્ય-તેજઃ-પ્રભામયઃ ॥ ૧૨॥

સદસત્પરમઃ પૂર્ણો વાઙ્મયો વરદોઽચ્યુતઃ ।
જીવો ગુરુર્હંસરૂપઃ પઞ્ચાશત્પીઠરૂપકઃ ॥ ૧૩॥

માતૃકામણ્ડલાધ્યક્ષો મધુધ્વંસી મનોમયઃ ।
બુદ્ધિરૂપશ્ચિત્તસાક્ષી સારો હંસાક્ષરદ્વયઃ ॥ ૧૪॥

મન્ત્ર-યન્ત્ર-પ્રભાવજ્ઞો મન્ત્ર-યન્ત્ર-મયો વિભુઃ ।
સ્રષ્ટા ક્રિયાસ્પદ-શ્શુદ્ધઃ આધારશ્ચક્ર-રૂપકઃ ॥ ૧૫॥

નિરાયુધો હ્યસંરમ્ભઃ સર્વાયુધ-સમન્વિતઃ ।
ઓમ્કારરૂપી પૂર્ણાત્મા આંકારસ્સાધ્ય-બન્ધનઃ ॥ ૧૬॥

ઐંકારો વાક્પ્રદો વગ્મી શ્રીંકારૈશ્વર્યવર્ધનઃ ।
ક્લીંકારમોહનાકારો હુંફટ્ક્ષોભણાકૃતિઃ ॥ ૧૭॥

ઇન્દ્રાર્ચિત-મનોવેગો ધરણીભાર-નાશકઃ ।
વીરારાધ્યો વિશ્વરૂપઃ વૈષ્ણવો વિષ્ણુરૂપકઃ ॥ ૧૮॥

સત્યવ્રતઃ સત્યધરઃ સત્યધર્માનુષઙ્ગકઃ’
નારાયણકૃપાવ્યૂહ-તેજશ્ચક્ર-સ્સુદર્શનઃ ॥ ૧૯॥

॥ શ્રી સુદર્શનાષ્ટોત્તરશતનામ સ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by
N. Balasubramanian bbalu at satyam.net.in

*shrI sudarshanAShTottarashatanAmastotram*
pdf was typeset on November 30, 2019

Please send corrections to *sanskrit@cheerful.com*